# শ্রীকেতু অষ্টোত্তরশতনামস্তোত্রম্

{॥ শ্রীকেতু অষ্টোত্তরশতনামস্তোত্রম্ ॥}

কেতু বীজ মন্ত্র - ॐ স্ত্রাঁ স্ত্রীং স্ত্রৌং সঃ কেতবে নমঃ ॥

শৃণু নামানি জপ্যানি কেতো রথ মহামতে ।
কেতুঃ স্থূলশিরাশ্চৈব শিরোমাত্রো ধ্বজাকৃতিঃ ॥ ১॥

নবগ্রহযুতঃ সিংহিকাসুরীগর্ভসম্ভবঃ ।
মহাভীতিকরশ্চিত্রবর্ণো বৈ পিংগলাক্ষকঃ ॥ ২॥

স ফলোধূম্রসংকাষঃ তীক্ষ্ণদংষ্ট্রো মহোরগঃ ।
রক্তনেত্রশ্চিত্রকারী তীব্রকোপো মহাসুরঃ ॥ ৩॥

ক্রূরকণ্ঠঃ ক্রোধনিধিশ্ছাযাগ্রহবিশেষকঃ ।
অন্ত্যগ্রহো মহাশীর্ষো সূর্যারিঃ পুষ্পবদ্গ্রহী ॥ ৪॥

বরহস্তো গদাপাণিশ্চিত্রবস্ত্রধরস্তথা ।
চিত্রধ্বজপতাকশ্চ ঘোরশ্চিত্ররথশ্শিখী ॥ ৫॥

কুলুত্থভক্ষকশ্চৈব বৈডূর্যাভরণ স্তথা ।
উৎপাতজনকঃ শুক্রমিত্রং মন্দসখস্তথা ॥ ৬॥

Stotram Digitalized By Sanskritdocuments.org

গদাধরঃ নাকপতিঃ অন্তর্বেদীশ্বরস্তথা ।

জৈমিনীগোত্রজশ্চিত্রগুপ্তাত্মা দক্ষিণামুখঃ ॥ ৭॥

মুকুন্দবরপাত্রং চ মহাসুরকুলোদ্ভবঃ ।

ঘনবর্ণো লম্বদেহো মৃত্যুপুত্রস্তথৈব চ ॥ ৮॥

উৎপাতরূপধারী চাঽদৃশ্যঃ কালাগ্নিসন্নিভঃ ।

নৃপীডো গ্রহকারী চ সর্বোপদ্রবকারকঃ ॥ ৯॥

চিত্রপ্রসূতো হ্যনলঃ সর্বব্যাধিবিনাশকঃ ।

অপসব্যপ্রচারী চ নবমে পাপদাযকঃ ॥ ১০॥

পঞ্চমে শোকদশ্চোপরাগখেচর এব চ ।

অতিপুরুষকর্মা চ তুরীযে সুখপ্রদঃ ॥ ১১॥

তৃতীযে বৈরদঃ পাপগ্রহশ্চ স্ফোটককারকঃ ।

প্রাণনাথঃ পঞ্চমে তু শ্রমকারক এব চ ॥ ১২॥

দ্বিতীযেঽস্ফুটবাগ্দাতা বিষাকুলিতবক্ত্রকঃ ।

কামরূপী সিংহদন্তঃ সত্যেঽপ্যনৃতবানপি ॥ ১৩॥

চতুর্থে মাতৃনাশশ্চ নবমে পিতৃনাশকঃ ।

অন্ত্যে বৈরপ্রদশ্চৈব সুতানন্দনবন্ধকঃ ॥ ১৪॥

সর্পাক্ষিজাতোঽনংগশ্চ কর্মরাশ্যুদ্ভবস্তথা ।
উপান্তে কীর্তিদশ্চৈব সপ্তমে কলহপ্রদঃ ॥ ১৫॥

অষ্টমে ব্যাধিকর্তা চ ধনে বহুসুখপ্রদঃ ।
জননে রোগদশ্চোর্ধ্বমূর্ধজো গ্রহনাযকঃ ॥ ১৬॥

পাপদৃষ্টিঃ খেচরশ্চ শাম্ভবোঽশেষপূজিতঃ ।
শাশ্বতশ্চ নটশ্চৈব শুভাঽশুভফলপ্রদঃ ॥ ১৭॥

ধূম্রশ্চৈব সুধাপাযী হ্যজিতো ভক্তবৎসলঃ ।
সিংহাসনঃ কেতুমূর্তী রবীন্দুদ্যুতিনাশকঃ ॥ ১৮॥

অমরঃ পীডকোঽমর্ত্যো বিষ্ণুদৃষ্টোঽসুরেশ্বরঃ ।
ভক্তরক্ষোঽথ বৈচিত্র্যকপটস্যন্দনস্তথা ॥ ১৯॥

বিচিত্রফলদাযী চ ভক্তাভীষ্টফলপ্রদঃ ।
এতৎকেতুগ্রহস্যোক্তং নাম্নামষ্টোত্তরং শতম্ ॥ ২০॥

যো ভক্ত্যেদং জপেৎকেতুর্নাম্নামষ্টোত্তরং শতম্ ।
স তু কেতোঃ প্রসাদেন সর্বাভীষ্টং সমাপ্নুযাত্ ॥ ২১॥

॥ ইতি কেতু অষ্টোত্তরশতনামস্তোত্রম্ সম্পূর্ণম্ ॥

Provided by Manda Krishna shrikanth mandaksk at gmail.com

Proofread by KSR Ramachandran ramachandran\—ksr at yahoo.ca

Please send corrections to sanskrit@cheerful.com

Last updated ত্oday

http://sanskritdocuments.org

Ketu Ashtottara Shatanama Stotram Lyrics in Bengali PDF
% File name : ketu108nAmastotra.itx
% Category : aShTottarashatanAma
% Location : doc_z_misc_navagraha
% Language : Sanskrit
% Subject : philosophy/hinduism/religion
% Transliterated by : Manda Krishna Srikanth mandaksk at gmail.com
% Proofread by : KSR Ramachandran ramachandran_ksr at yahoo.ca
% Latest update : November 19, 2012
% Send corrections to : Sanskrit@cheerful.com
% Site access : http://sanskritdocuments.org
%
% This text is prepared by volunteers and is to be used for personal study
% and research. The file is not to be copied or reposted for promotion of
% any website or individuals or for commercial purpose without permission.
% Please help to maintain respect for volunteer spirit.
%

We acknowledge well-meaning volunteers for Sanskritdocuments.org and other sites to have built the collection of Sanskrit texts.
Please check their sites later for improved versions of the texts.
This file should strictly be kept for personal use.
PDF file is generated [ October 13, 2015 ] at Stotram Website